योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः १७

सप्तदशः सर्गः १७

श्रीराम उवाच ।

भगवन्भृगुपुत्रस्य प्रतिभासानुभूतितः ।

यथैषा सफला जाता तथान्यस्य न किं भवेत् ।। १

श्रीवसिष्ठ उवाच ।

इयं प्रथममुत्पन्ना सा तनुर्ब्रह्मणः पदात् ।

शुद्धा जातिर्भार्गवस्य नान्यजन्मकलङ्किता ।। २

सर्वैषणानां संशान्तौ शुद्धचित्तस्य या स्थितिः ।

तत्सत्यमुच्यते सैषा विमला चिदुदाहृता ।। ३

मनोनिर्मलसत्त्वात्म यद्भावयति यादृशम् ।

तत्तथाशु भवत्येव यथावर्तो भवेत्पयः ।। ४

यथा भृगुसुतस्यैव विभ्रमः प्रोत्थितः स्वयम् ।

प्रत्येकमप्येवमेव दृष्टान्तोऽत्र भृगोः सुतः ।। ५

बीजस्याङ्कुरपत्रादि स्वं चमत्कुरुते यथा ।

सर्वेषां भूतसङ्घानां भ्रमखण्डास्तथैव हि ।। ६

यदिदं दृश्यते विश्वमेवमेवाखिलं जगत् ।

प्रत्येकमुदितं मिथ्या मिथ्यैवास्तमुपैति च ।। ७

नास्तमेति नचोदेति जगत्किंचन कस्यचित् ।

भ्रान्तिमात्रमिदं मायामुग्धेव परिजृम्भते ।। ८

यथा संप्रतिभासस्थः स्वयं संसारखण्डकः ।

तथा तेषां सहस्राणि मिथ्या दृष्टानि सन्ति हि ।। ९

स्वप्नसंकल्पनगरव्यवहाराः परस्परम्।

पृथग्यथा न दृश्यन्ते तथैते संसृतिभ्रमाः ।। १०

एवं नगरवृन्दानि नभस्संकल्परूपिणि ।

सन्ति तानि न दृश्यन्ते मिथ्याज्ञानदृशं विना ।। ११

पिशाचयक्षरक्षांसि सन्त्येवंरूपकाणि ह ।

संकल्पमात्रदेहानि सुखदुःखमयानि च ।। १२

एवमेव वयं चेमे संपन्ना रघुनन्दन ।

स्वसंकल्पात्मकाकारा मिथ्यासत्यत्वभाविनः ।। १३

एवंरूपैव हि परे विद्यते सर्गसंततिः ।

न वास्तवी वस्तुता तु संस्थितैवमवस्तुनि ।। १४

प्रत्येकमुदितं विश्वमेवमेव मुधैव हि ।

वनगुल्मकरूपेण वसन्तैकरसो यथा ।। १५

प्रथमोऽयं स्वसंकल्पः प्रथामभ्यागतो यथा ।

तथातिपरमार्थेन दृष्टेनेत्थं विभाव्यते ।। १६

प्रत्येकमुदितं चित्तं स्वस्वभावोदरस्थितम् ।

इदमित्थं समारम्भं जगत्पश्यन्विनश्यति ।। १७

प्रतिभासवशादस्ति नास्ति वस्त्ववलोकनात्।

दीर्घस्वप्नो जगज्जालमालानं चित्तदन्तिनः ।। १८

चित्सत्तैव जगत्सत्ता जगत्सत्तैव चित्तकम् ।

एकाभावाद्वयोर्नाशः स च सत्यविचारणात् ।। १९

शुद्धस्य प्रतिभासो हि सत्यो भवति चेतसः ।

प्रमार्जनादिव मणेर्मलिनस्येह युक्तितः ।। २०

चिरमेकदृढाभ्यासाच्छुद्धिर्भवति चेतसः ।

अनाक्रान्तस्य संकल्पैः प्रतिभोदेति चेतसः ।। २१

सुवर्णं न स्थितिं याति मलवत्यंशुके यथा ।

एका दृष्टिः स्थितिं याति न म्लाने चित्तके तथा ।। २२

श्रीराम उवाच ।

प्रतिभासात्मनि जगत्येते कालक्रियाक्रमाः ।

सोदयास्तमया जाताः कथं शुक्रस्य चेतसः ।। २३

श्रीवसिष्ठ उवाच ।

यादृग्जगदिदं दृष्टं शुक्रेण पितृशास्त्रतः ।

तादृक्कस्य स्थितं चित्ते मयूराण्डे मयूरवत् ।। २४

स्वभावकोशस्थमिदं तदेतेन क्रमोदितम् ।

बीजेनाङ्कुरपत्रादिलतापुष्पफलं यथा ।। २५

जीवो यद्वासनाबद्धस्तदेवान्तः प्रपश्यति ।

स्वरूपं चात्र दृष्टान्तो दीर्घस्वप्नस्त्विदं जगत् ।। २६

प्रत्येकमुदितो राम नूनं संसृतिखण्डकः ।

रात्रौ सैन्यनरस्वप्नजालवत्स्वात्मनि स्फुटः ।। २७

श्रीराम उवाच ।

एष संसृतिखण्डोत्थो मिथः स मिलति स्वयम् ।

नो वा मिलति तन्मे त्वं यथावद्वक्तुमर्हसि ।। २८

श्रीवसिष्ठ उवाच ।

मलिनं हि मनोऽवीर्यं न मिथः श्लेषमर्हति ।

अयोऽयसि च संतप्ते शुद्धे तप्तं तु लीयते ।। २९

चित्ततत्त्वानि शुद्धानि संमिलन्ति परस्परम् ।

एकरूपाणितोयानि यान्त्यैक्यंनाविलानि हि ।। ३०

शुद्धिर्हि चित्तस्य विवासनत्व-

मभूतसंवेदनमेकरूपम् ।

तस्याशु शुद्ध्या भवति प्रबुद्ध-

स्तन्मात्रयुक्त्या परसंगमेति ।। ३१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मो० स्थि० भार्गवोपाख्याने मनोराज्यसंमेलनं नाम सप्तदशः सर्गः ।।